अथ

पञ्च सूक्तानि

[पुरुषसूक्त-विष्णुसूक्त-नारायणसूक्त-
श्रीसूक्त-लक्ष्मीसूक्तानि]

तृतीयं संस्करणम्]

[मूल्यम् -)

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

विविध-पुस्तक-प्राप्तिस्थानम् ।

मास्टर खेलाड़ीलाल ऐण्ड सन्स,

संस्कृत बुकडिपो,

कचौड़ीगली, बनारस सिटी ।

इदं पुस्तकं काश्यां मास्टर खेलाड़ीलाल ऐण्ड सन्स इत्यस्य जे. एन. यादव महोदयैः
कु० व० पावगी द्वारा काश्यां रामचन्द्रे हितचिन्तकनाम्नि यन्त्रालये
मुद्रयित्वा प्राकाश्यं नीतम् ।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्रीगणेशाय नमः ॥ अथ पुरुषसूक्तम् ॥
हरिः ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिꣳ सर्व्वतस्स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुष एवेदꣳ सर्व्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥२॥ एतावानस्य महिमाऽतो ज्यायाँश्च पूरुषः ॥ पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ॥३॥ त्रिपादूर्द्ध्वऽउदैत्पुरुषः पादोऽस्येहाऽभवत्पुनः ॥ ततो विष्वङ्व्यक्रामत्साश-

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पु० ॥१॥

नानश॒नेऽअ॒भि॥४॥ ततो॑ व्वि॒राड॑जायत व्वि॒राजो॒ सू०
अधि॒पूरु॑षः॥स जा॒तोऽअत्य॑रिच्यत प॒श्चाद्भूमि॒मथो॑
पु॒रः॥५॥ यत्पुरु॑षेण ह॒विषा॑ दे॒वा य॒ज्ञम॑तन्न्वत ॥
व्व॒मन्तो॑स्यासी॒दाज्ज्यं॑ ग्री॒ष्म्मऽइ॒ध्मः॒ श॒रद्ध॒विः॒
॥६॥ तं य्य॒ज्ञं ब॒र्हिषि॒ प्रौ॑क्षन्न्पुरु॑ष॒ञ्जात॑मग्ग्र॒त॒ः॥
तेन॑ दे॒वाऽअ॑यजन्त सा॒द्ध्याऽऋष॑यश्च॒ ये ॥ ७ ॥
तस्मा॑द्य॒ज्ञात्सर्व्व॑हुत॒ः॒ सम्भृ॑तम्पृषदा॒ज्यम् ॥
प॒शूँस्ताँश्च॑क्रे व्वाय॒व्यान्नार॒ण्याग्रा॒म्यश्च॒ ये ॥८॥
तस्मा॑द्य॒ज्ञात्सर्व्व॑हुत॒ऽऋचः॒ सामा॑नि जज्ञिरे ॥ ॥१॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

छन्दांꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥९॥
तस्मादश्वाऽअजायन्त ये के चोभयादतः ॥ गावो-
ह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः ॥१०॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ॥ मुख-
ङ्किमस्यासीत्किं बाहू किमूरू पादाउच्च्येते ॥११॥
ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः ॥
ऊरू तदस्य यद्वैश्यः पद्भ्याꣳशूद्रोऽअजायत ॥१२॥
चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत ॥
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥१३॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नाभ्यांऽआसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्तत ॥ पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ २ ॥ ऽअकल्पयन् ॥ १४ ॥ सप्तास्स्यांसन्परिधयस्त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञन्तन्वानाः अबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ॥ ते ह नाकम्महिमानꣳ सचन्त यत्र पूर्वे साद्याः सन्ति देवाः ॥ १६ ॥

इति श्री पुरुषसूक्तं समाप्तम् ।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अथ विष्णुसूक्तम् ।

विष्णवे नमः ॥ विष्णोर्नु कं वीर्य्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि । यो अस्कभायदुत्तरꣳसधस्थं विचक्रमाणस्त्रेधोरुगायः ॥१॥ प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥२॥ विष्णोः रराटमसि विष्णोः पृष्ठमसि विष्णोश्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि वि-

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ष्णवे त्वा ॥ ३ ॥ प्र विष्णवे शूषमेतु मन्म गिरि-
क्षित उरुगायाय वृष्णे । य इदं दीर्घं प्रयतं सध-
स्थमेको विममे त्रिभिरित्पदेभिः ॥ ४ ॥ इदं
विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य
पाः सुरे त्रीणि पदाविचक्रमे विष्णुर्गोपा अदाभ्यः
॥ ५ ॥ यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा
स्वधया मदन्ति । य उ त्रिधा तु पृथिवीमुतद्यामेको
दधार भुवनानि विश्वा ॥ ६ ॥ तदस्य प्रियमभि
पाथो अस्यां नरो यत्र देवयवो मदन्ति । उरुक्र-

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥७॥ ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमवभाति भूरि ॥ ८ ॥

इति श्री विष्णुसूक्तं समाप्तम् ।

अथ नारायणसूक्तम् ।

सहस्रशीर्षं देवं विश्वाक्षं विश्वशं भुवम् । विश्वं नारायणं देवमक्षरं परमं प्रभुम् । विश्वतः परम नित्यं विश्वं नारायणꣳहरिम् । विश्वमेवेदं पुरुष-

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्तद्विश्वमुपजीवति। पतिं विश्वस्यात्मेश्वरꣳशा-
श्वतꣳ शिवमच्युतम्। नारायणं महाज्ञेयं विश्वा-
त्मानं परायणम्। नारायणःपरं ब्रह्म तत्त्वं नारायणः
परः। नारायणःपरो ज्योतिरात्मा नारायणःपरः॥
नारायणपरो ध्याता ध्यानं नारायणःपरः। यच्च कि-
ञ्चिज्जगत्सर्वं दृश्यतेऽपि वा। अन्तर्बहिश्च
तत्सर्वं व्याप्य नारायणः स्थितः॥ १॥ अनन्त-
मव्ययं कविꣳ समुद्रेऽन्तं विश्वशं भुवम्।
पद्मकोषप्रतीकाशꣳ हृदयं चाप्यधोमुखं। अथो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

निष्टया वितस्त्यां तु नाभ्यामुपरि तिष्ठति। हृदयं
तद्विजानीयाद्विश्वस्यायतनं महत्। सन्ततश्च
शिराभिस्तु लम्बत्या कोशसन्निभम्। तस्यान्तें
सुषिरश्च सूक्ष्मं तस्मिन्त्सर्वं प्रतिष्ठितम्। तस्य
मध्यें महानग्निर्विश्वार्चिर्विश्वतोमुखः। सोऽग्रभु-
ग्विभजन्तिष्ठन्नाहारमजरः कविः। तिर्यगूर्ध्वमधः
शायी रश्मयस्तस्य सन्ततः। संतापयति स्वं देह-
भावादतलमस्तकम्। तस्य मध्ये वह्निशिखा
अणीयोर्ध्वा व्यवस्थिता ॥ २ ॥ नीलतोयद-

CC-0. Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मध्यस्था विद्युल्लेखेव भास्वरा। नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा। तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। स ब्रह्मा स शिवः (स हरिः) सेन्द्रः सोऽक्षरः परमस्स्वराट्॥ ३॥

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमः॥ ४॥

ॐ नारायणायं विद्महे वासुदेवायं धीमहि। तन्नो विष्णुः प्रचोदयात्॥ ५॥

इति श्री नारायणसूक्तं समाप्तम्।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अथ श्रीसूक्तम् ।

श्रीगणेशाय नमः ॥ ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥ चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १ ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ॥ यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ॥ श्रियं देवीमुपह्वये श्रीर्मा देवीजुषताम् ॥ ३ ॥ काँ सोस्मि तां हिरण्यप्राकारा-मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ॥ पद्मे स्थितां

CC-0. Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥ चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ॥ तां पद्मनेमीं शरणं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ॥ तस्य फलानि तपसा नुदन्तु मायान्तरायाश्च बाह्याऽअलक्ष्मीः ॥ ६ ॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह ॥ प्रादुर्भूतो सुराष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥ ७ ॥ क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नांशयाम्यम्यहम् ॥ अभूतिमसंमृद्धिं च सर्वा
निर्णुद मे गृहात् ॥ ८ ॥ गन्धद्वारां दुराधर्षां
नित्यपुष्टा करीषिणीम् ॥ ईश्वरी ꣳ सर्वभूतानां
तामिहोपह्वये श्रियम् ॥९॥ मनसः काममाकूतिं
वाचः सत्यमंशीय । पशूनाꣳ रूपमन्नस्य मयि
श्रीः श्रयतां यशः ॥ १० ॥ कर्दमेन प्रजा भूता
मयि संम्भव कर्दम ॥ श्रियं वासय मे कुले मातरं
पद्ममालिनीम् ॥११॥ आपः स्रजन्तु स्निग्धानि
चिक्लीत वस मे गृहे ॥ नि चं देवीं मातरं श्रियं

CC-0. Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वासयं मे कुले ॥१२॥आर्द्रां पुष्करिणीं पुष्टीं पिङ्गलां (सुवर्णां हेम) पद्ममालिनीम् चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३॥ आर्द्रायः करिणीं यष्टिं सुवर्णां हेममालिनीम्॥सूर्यां हिरण्मयी लक्ष्मीं जातवेदो म आवह ॥१४॥ तां मऽआवह जातवेदो लक्ष्मीमनपगामिनीम् ॥ यस्यां हिरण्यं प्रभूत गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५॥ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ॥ सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥

इति श्री श्रीसूक्तं समाप्तम्।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अथ लक्ष्मीसूक्तम् ।

श्रीः ॥ सरसिजनिलये सरोजहस्ते धवल-
तरांशुकगन्धमाल्यशोभे ॥ भगवति हरिवल्लभे
मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १ ॥
धनमग्निर्धनं वायुर्धनं सूर्यो धनं वसुः ॥ धनमिन्द्रो
बृहस्पतिर्वरुणं धनमस्तु मे ॥ २ ॥ वैनतेय सोमं
पिब सोमं पिबतु वृत्रहा ॥ सोमं धनस्य सोमिनो
मह्यं ददातु सोमिनः ॥ ३ ॥ न क्रोधो न च
मात्सर्यं न लोभो नशुभा मतिः ॥ भवन्ति

CC-0. Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कृतपुण्यानां भक्तानां मुक्तजापिनाम् ॥ ४ ॥
पद्मानने पद्म ऊरु पद्माक्षि पद्मसम्भवे ॥ तन्मे
भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ ५ ॥
विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ॥
विष्णुप्रियां सखीं देवीं नमाम्यच्युतवल्लभाम् ॥६॥
महालक्ष्म्यै च विद्महे विष्णुपत्न्यै च धीमहि ॥
तन्नो लक्ष्मीः प्रचोदयात् ॥ ७ ॥ पद्मानने पद्मिनि
पद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ॥ विश्वप्रिये
विश्वमनोऽनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥ ८ ॥ आनन्दः कर्दमश्चैव चिक्लीत इति विश्रुताः ॥ ऋषयस्ते त्रयः प्रोक्तास्स्वयं श्रीरेव देवता ॥ ९ ॥ ऋणरोगादिदारिद्र्यं पापञ्च अपमृत्यवः ॥ भयशोकमनस्तापा नश्यन्तु मम सर्वदा ॥ १० ॥ श्रीर्वर्चस्वमायुष्यमारोग्यमाविंधाच्छोभमानं महीयतें ॥ धनं धान्यं पशुं बहुपुंत्र लाभं शतसंवत्सरं दीर्घमायुः ॥ ११ ॥

इति श्री लक्ष्मीसूक्तं समाप्तम्।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri